॥ श्रीः ॥

हृदयनारायणदेवविरचितम्

हृदयकौतुकम् ।

एतत्पुस्तकम्

पुण्यपत्तनस्थपंडितदत्तात्रेयकेशवजोशीत्यभिधेन

यथामति संशोधितम्।

तच्च

भालचन्द्रशर्मणा

आर्यभूषणाख्यमुद्रालये मुद्राक्षरैरंकयित्वा

प्राकाश्यं नीतम् ।

शकः १८४० सन् १९१८

(सर्वेऽधिकाराः स्वायत्तीकृताः)

अस्य ग्रन्थस्य मुद्रणे यद्धनमपेक्षितं तत्सकलमपि
श्रीमन्महीशूरयुवराजमहाशयैः 'सर के. नरसिंह-
राज वडियार जी. सी. आय्. ई.'
इति लक्षणांकितैः परमो-
दारचरितैरदायि ।

Printed at the Arya-Bhushan Press, Poona,
by Anant Vinayak Patwardhan,
AND
Published by Bhalchandra Sitaram Sukthankar, M. A. LL. B.
at 2 Malabar Hill, Bombay.

प्रस्तावना.

" हिंदुस्थानी संगीत पद्धति " ग्रंथ लिहिणारानें आपल्या रागांचें विवेचन करतांना ठिकठिकाणीं प्राचीन संगीतशास्त्रग्रंथांतील उतारे घेऊन प्रत्येक रागासंबंधीं जुने ग्रंथकार कायकाय म्हणतात, हें सांगण्याचा स्तुत्य प्रयत्न केला आहे, हें त्या ग्रंथाच्या वाचकांस विदितच आहे. प्राचीन मतें सांगून मग सांप्रत त्या रागाचें स्वरूप कसें आहे हें तो उदाहरणांसह सांगत गेला आहे. त्या त्याच्या आधारग्रंथांच्या नकला प्रयासानें मिळवून ते ग्रंथ प्रसिद्ध करण्याचें काम हल्लीं सुरूं आहे. प्रस्तुतचे हृदयकौतुक व हृदयप्रकाश हे ग्रंथ त्याच प्राचीन ग्रंथमालिकेंतले आहेत; संगीतरत्नाकर, संगीतदर्पण, स्वरमेलकलानिधि, रागमाला, सद्रागचंद्रोदय, अष्टोत्तरशततालनिरूपण, रागलक्षण, चत्वारिंशत्शतरागलक्षण, सारामृत वगैरे छापले गेलेच आहेत.

हृदयकौतुक व हृदयप्रकाश हे ग्रंथ "गढादेशाधिप हृदयनारायणदेव" यांनीं लिहिले असें ग्रंथांच्या शेवटीं म्हटलें आहे. पुराणवस्तुशोधकांच्या मदतीनें असें समजतें कीं " गढादेश " हा प्रांत जबलपुराभोंवतींचा असावा. जबलपुराजवळ गढा नांवाचें फार प्राचीन एक लहानसें गांव अजूनही आहे. हृदयनारायणदेव हा राजा विक्रमसंवत् १७२४ (इ. स. १६६७) च्या सुमारास झाला असावा, असें पुराणवस्तुशोधकांकडून आम्हांस समजतें.

हृदयकौतुक व हृदयप्रकाश हे ग्रंथ लहान आहेत, परंतु आपल्या उत्तरेच्या संगीताला इतिहासदृष्टीनें फारच महत्त्वाचे आहेत. या ग्रंथांच्या हस्तलिखित नकला बिकानेरच्या लायब्ररींत आहेत. त्या नकला आम्हांस डॉ. विष्णु सीताराम सुकथनकर M. A.

Ph. D. यांच्या मार्फत पाहण्याचा सुयोग आला म्हणून आम्ही त्या गृहस्थांचे फार आभारी आहों.

या दोन लहानशा ग्रंथांत कांहीं गोष्टी लक्षांत ठेवण्यासारख्या आहेत. त्या अशा; हे ग्रंथ आपल्या उत्तरसंगीतपद्धतीच्या आधार-ग्रंथांपैकीं असल्यामुळें त्यांचा शुद्धस्वरमेल आपल्या अर्वाचीन "काफी" रागाचा आहे. त्याचप्रमाणें ग्रंथकारानें उत्तरेकडे प्रचलित असलेल्या तीव्र कोमल वगैरे संज्ञांचा उपयोग आपले मेल व राग सांगतांना केला आहे. राग तर बहुतेक सारे आपण गातों तेच आहेत. अलबत, आतां ग्रंथांना दोनशें वर्षे होऊन गेल्यामुळें रागनियम कांहीं प्रमाणानें बदलण्याचा संभव होताच तथापि अनेक रागांचे मेल आपल्या आजच्या त्यांच्या स्वरूपांना बरेच जवळ आहेत.

आमचें मत आहे कीं, ग्रंथकारानें हृदयकौतुक हा ग्रंथ प्रथम लिहिला असावा. व त्यावेळीं त्यानें पंडितलोचनाचा " रागतरंगिणी " ग्रंथ पाहिला असावा. स्वराध्याय ग्रंथकारानें बहुतेक सारा त्यांतलाच घेतलेला दिसतो.

रागतरंगिणीचे मेल कोठें कोठें वाचकांस संशयांत पाडण्याजोगे होते तेहि ग्रंथकारानें आपल्या भाषेनें अधिक स्पष्ट केले. हृदयनारायण-देवानें तीव्रतम ग, नि, दाखल करण्याकरितां हृदयरमा हा एक थाट नवा दाखल केला. दक्षिणेचे कांहीं ग्रंथकार तीव्रतम स्थानाचे स्वर आपल्या रागवर्णनांत सांगत असत व ते स्वर आपल्या उत्तरेकडेहि योग्य वाटल्यास घेतां यावे, म्हणून त्यानें तसें केलें असेल. ग्रंथकाराच्या मनांत दक्षिणेच्या विद्वान् लेखकांविषयीं आदर होता असें दिसतें, व तसेंच साऱ्या देशांत जर स्वरध्वनि सारखेच होते, तर भिन्नपरिभाषांनीं उत्पन्न होणारे गैरसमज उगीच समाजांत कां राहूंद्या, असेंहि त्याला वाटलें असावें असें दिसतें.

हृदयकौतुक ग्रंथ लिहिल्यावर कांहीं काळानें ग्रंथकारानें संगीत-पारिजात पाहिला असावा. त्या ग्रंथांत स्वरस्थानांचा तारेच्या लांबीनें केलेला तो खुलासा पाहून त्याच्या मनांत एकदम नवा प्रकाश उत्पन्न होऊन आपणही तो प्रकार स्वीकारण्याचें त्याचें मनांत आलें असावें. " हृदयप्रकाश " हा ग्रंथ लिहिण्याची स्फूर्ती त्यास पारिजातानें झाली असावी, असें आमचें अनुमान आहे. परंतु तेथें एक गोष्ट हृदयनारायणदेवानें पारिजातकाराहून अधिक चांगली केली. दक्षिणेकडील अंतरगांधार व काकलीनिषाद यांचीं योग्यस्थानें ओळखून त्यांच्याशीं समांतर उत्तरेचे ध्वनि म्हणजे जे तीव्रतर ग, नि, त्यांची योजना त्यानें आल्या हृदयप्रकाशांत निर्भयपणें केली. असें केल्यानें त्यानें उत्तरेच्या लेखकांना दक्षिणेच्या ग्रंथांची परिभाषा समजत नसे, असें म्हणणाऱ्यांचा आक्षेप दूर केला. किंबहुना दक्षिणेच्या ग्रंथकारांविषयीं मोठा आदरच उत्तरेकडे असे, असें प्रतिपादन करण्यास सबळ पुरावा हजर केला. तशा पुराव्याची वस्तुतः फारशी त्यावेळीं जरूरही नसेल, कारण पुंडरिक, भावभट्ट, अहोबल हे सारे प्रथम दक्षिणेकडूनच आलेले पंडित नव्हते का? परंतु तसा पुरावा आजामित्तीस स्पष्ट असलेला बरा असें आम्हांला वाटतें.

हृदयप्रकाशाची ती सुबोध व मार्मिक रचना पाहून कोणाही विद्वानास ग्रंथकारासंबंधीं मोठा अभिमान वाटेल यांत संशय नाहीं. सोळा सतरा व आठरा या शतकांतल्या लेखकांनीं प्राचीन ग्राममूर्छना जातींची व कन्या–वर्त्यांची रिकामी भानगड सोडून देऊन अतिसुबोध व सरळ " मेल व फीमेलजन्य " पद्धति स्वीकारण्याचें पसंत केलें, ही आपल्या संगीतइतिहासांत एक अमोलिक गोष्ट आहे, असें म्हणणें चुकीचें होणार नाहीं. गेल्या तीनशें वर्षांत झालेल्या संगीताच्या उलटापालटीला याहून सोपी दुसरी पद्धतिच झाली नसती. सारें गायन–वादन एका षड्जग्रामांत आल्यानें व गाय-

कांना वाटें वाजविणारांचे सोयीकडे पाहून वागण्याची फारशी जरूर न राहिल्यानें " थाट व तज्जन्य राग " ही पद्धति समाजास सुसमंजस व फार सोयीची ठीकच झाली. दक्षिणेकडे व्यंकटमखीनें तर ७२ मेलांची ती रचना करून कितीतरी मिश्ररागांना वर्गीकृत करण्याची सोय करून ठेविली.

एकंदरींत हे दोनं ग्रंथ म्हणजे उत्तर पद्धतीच्या आधारग्रंथांपैकीं आहेत यांत संशय नाहीं, व यांच्या प्रकाशनानें गायनविद्येचा अभ्यास करणारास बराच फायदा होईल अशी आमची उमेद आहे.

पुणें,
ता० २२।६।१८

पंडित दत्तात्रेय केशव जोशी.

॥ श्रीः ॥

हृदयकौतुकम् ।

श्रीवाग्देवताचरणारविंदाभ्यां नमः ।

देवदेवं महादेवं प्रणम्य भरतं तथा ।
संगीतकौतुकं राज्ञा हृदयेशेन कथ्यते ॥ १ ॥
गढादेशनरेशेन हृदयेशेन धीमता ।
संगीतसारमाकृष्य कथ्यते रागसंस्थितिः ॥ २ ॥
सोमकन्याजनुर्मूलगढादेशाधिपेन च ।
क्रियते हृदयेशेन मयासौ स्वरसंग्रहः ॥ ३ ॥
वीणायां सर्वरागाणां स्वराणां संस्थितिस्तु या ।
तस्या वादनमात्रेण रागव्यक्तिः प्रजायते ॥ ४ ॥
तास्तु संस्थितयः प्राच्यो रागाणां द्वादश स्मृताः ।
याभी रागाः प्रगीयन्ते प्राचीना रागपारगैः ॥ ५ ॥
रागिणी हृदयेशेन या हृदयरमेरिता ।
उक्ता तदनुरोधेन स्थितिस्तासु त्रयोदशी ॥ ६ ॥

स्वस्वशेषश्रुतिं त्यक्त्वा यदा ऋषभधैवतौ ।
गीयेते गुणिभिः सर्वैस्तदा तौ कोमलौ मतौ ॥ ७ ॥
गृह्णाति मध्यमस्यापि गांधारः प्रथमां श्रुतिम् ।
यदा तदा जनैरेष तीव्र इत्यभिधीयते ॥ ८ ॥
द्वितीयामपि चेदेवं तदा तीव्रतरः स्मृतः ।
तृतीयामपि चेदेवं तदा तीव्रतमः स्मृतः ॥ ९ ॥

चतुर्थ्यामपि चेदेवमतितीव्रतमः स्मृतः ।
अतितीव्रतमो गस्तु सारंगे परिगीयते ॥ १० ॥
षड्जस्य च निषादश्चेद् गृह्णाति प्रथमां श्रुतिम् ।
तदा संगीतिभिः सोऽपि तीव्र इत्यभिधीयते ॥ ११ ॥
द्वितीयामपि चेदेवं तदा तीव्रतरः स्मृतः ।
तृतीयामपि चेदेवं तदा तीव्रतमः स्मृतः ॥ १२ ॥
षड्जस्य द्वे श्रुती गृह्णन् निषादः काकली स्मृतः ।
तीव्रतरे निषादे च गेया सैव विचक्षणैः ॥ १३ ॥
या हृदयरमा प्रोक्ता हृदयेशेन धीमता ।
तिस्रस्तिस्रः श्रुतीर्निर्मो गृह्णाति सपयोः क्रमात् ॥ १४ ॥
मृदुसा मृदुपा चारुया निमयोर्जायते सदा ।
सपयो रिधयोश्चैव तथैव गनिपादयोः ॥ १५ ॥
संवादः कथितो विज्ञैर्मसयोः स्वरयोर्मिथः ।

हृदि मंद्रो गले मध्यो मूर्ध्नि तार इति क्रमात् ॥ १६ ॥
द्विगुणः पूर्वपूर्वस्मात् स्वरः स्यादुत्तरोत्तरः ।

इति संज्ञाप्रकरणम् ।

अथ स्वरेषु श्रुतिविभागप्रकरणम् ।

द्वाविंशतिस्तु श्रुतयः स्वराणां भागशः स्मृताः ॥ १७ ॥
तद्यथा श्रूयतां तावत् संगीतांबुधिपारगैः ।
तीव्रा कुमुद्वती मंदा छंदोवत्यस्तु षड्जगाः ॥ १८ ॥
दयावती रंजनी च रतिका रिषभे स्थिताः ।
रौद्री क्रोधा च गांधारे वज्रिकाऽथ प्रसारिणी ॥ १९ ॥
प्रीतिश्च मार्जनीत्येताः श्रुतयो मध्यमाश्रिताः ।
क्षिती रक्ता च संदीपिन्यालापिन्यपि पंचमे ॥ २० ॥

मदंती रोहिणी रम्येत्येता धैवतसंश्रयाः ।
उग्रा च क्षोभिणी च द्वे निषादे वसतः श्रुती ॥ २१ ॥

इति स्वरश्रुतिविभागप्रकरणम् ।

शुद्धाः सप्तस्वरा रम्या वादनीयाः प्रयत्नतः ।
तेन वादनमात्रेण भैरवी जायते शुभा ॥ २२ ॥
अन्ये तु भैरवीरागे धैवतं कोमलं विदुः ।
तदशुद्धं यतस्तादृङ् नायं रागोऽनुरंजकः ॥ २३ ॥

इति भैरवीसंस्थानम्§ ।

शुद्धाः सप्तस्वराः कार्या रिधौ तेषु च कोमलौ ।
टोडी सुरागिणी ज्ञेया ततो गायकनायकैः ॥ २४ ॥

इति टोडीसंस्थानम् ।

एवं सति च गांधारो द्वे श्रुती मध्यमस्य चेत् ।
गृह्णाति काकली निः स्यात् तदा गौरी प्रवर्तते ॥ २५ ॥

इति गौरीसंस्थानम् ।

शुद्धाः सप्तस्वरास्तेषु गांधारो मध्यमस्य चेत् ॥ २६ ॥
गृह्णाति द्वे श्रुती गीता कर्णाटी जायते तदा ।

इति कर्णाटसंस्थानम् ।

एवं सति निषादश्चेत् काकली भवति स्फुटम् ॥ २७ ॥
वीणायां व्यक्तिमाधत्ते केदारी रागिणी तदा ।

इति केदारसंस्थानम् ।

एवं सति च संस्थाने मध्यमः पंचमस्य चेत् ॥ २८ ॥
गृह्णाति द्वे श्रुती राग ईमनो जायते तदा ।

इति ईमनसंस्थानम् ।

एवं सति च गांधारः शुद्धमध्यमतां व्रजेत् ॥ २९ ॥

---

§ संस्थानमिति " ठाठ " प्रसिद्धम्

धश्च शुद्धनिषादः स्यात् सारंगो जायते तदा ।

इति सारंगसंस्थानम् ।

धनिषादौ च शार्ङ्गस्य कर्णाटस्य गमौ यदि ॥ ३० ॥
भवेतां रागराजन्यो मेघरागः प्रजायते ।

इति मेघसंस्थानम् ।

एवं सति च गांधारस्त्रिश्रुतीर्मध्यमस्य चेत् ॥ ३१ ॥
गृह्णाति च निषादोऽपि षड्जस्य त्रिश्रुतीर्यदि ।
गढादेशनरेशेन हृदयेशेन धीमता ॥ ३२ ॥
कल्पिता रागिणी रम्या स्याद्धृदयरमा तदा ।

इति हृदयरमासंस्थानम् ।

रिषभः कोमलो गस्तु द्वे श्रुती मध्यमस्य चेत् ॥ ३३ ॥
गृह्णाति द्वे श्रुती मश्च पंचमस्य विशेषतः ।
धैवतः कोमलो निश्च षड्जस्य द्वे श्रुती तदा ॥ ३४ ॥
गृह्णाति रागिणी रम्या धनाश्रीर्जायते तदा ।

इति धनाश्रीसंस्थानम् ।

सर्वशेषे लेख्याः ।

शुद्धाः सप्त स्वरास्तेषु धैवतः कोमलो भवेत् ॥ ३५ ॥
वीणायां जायते शुद्धा मुखारीसंस्थितिस्तदा ।

इति मुखारीसंस्थानम् ।

ईमनस्वरसंस्थाने निषादप्रथमश्रुतिम् ।
गृह्णाति धैवतश्चैषा पूर्वायाः स्वरसंस्थितिः ॥ ३६ ॥

इति पूर्वासंस्थानम् ।

अथ ठाठप्रकरणे दीपकसंस्थानं लेख्यम् ॥

॥ ठाठ १३ ॥

एतासु सकला रागा जायन्ते वादनक्रमा ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रास्ते स्युश्चतुर्विधाः ॥ ३७ ॥

संपूर्णा ब्राह्मणाः प्रोक्ताः क्षत्रियाः षाडवा मताः ।
औडुवाः कथिता वैश्याः शूद्रास्तदितरे क्वचित् ॥ ३८ ॥

इति स्वरजातिप्रकरणम् ।

नीलांबरी सदा गेया भैरवीरागिणीस्थितौ ।

एतौ रागौ भैरवीसंस्थाने ।

टोडी च रागिणी कापि स्वास्थितौ सैव गीयते ॥ ३९ ॥

एष रागः टोडीसंस्थाने ।

गौरीसंस्थितिमध्ये तु येषां संस्थितयो मताः ।
तेषां नामानि कथ्यन्ते क्रमेणैतान्यशेषतः ॥ ४० ॥
मालवः स्याद्गुणमयः श्रीगौरी च विशेषतः ।
चैतीगौरी तथा प्रोक्ता पहाडीगौरिका पुनः ॥
देशीटोडी देशकारो गौडो रागेषु सत्तमः ।
त्रिवणः स्यान्मूलतानी–धनाश्रीश्च वसंतकः ॥ ४२ ।
गौरा भैरवरागश्च विभासो रागसत्तमः ।
रामकरी तथा गेया गुर्जरी बहुली ततः ॥ ४३ ॥
रेवा च भटियालश्च खटरागस्तथोत्तमः ।
मालश्रीः पंचमः किंच जयतश्रीश्च रागिणी ॥ ४४ ॥
आसावरी तथा गेया देवगांधार एव च ।
सिंधीआसावरी गेया गेया गुणकरी तथा ॥ ४५ ॥

एते रागा गौरी संस्थाने ।

कर्णाटस्थितिमध्ये तु येषां संस्थितयो मताः ।
तेषां नामानि कथ्यन्ते श्रुत्वा सद्योऽवधारय ॥ ४६ ॥
षाडवः कानरो रागो देशीविख्यातिमागतः ।
वागीश्वरीकानरश्च खंबाइची तु रागिणी ॥ ४७ ॥
सोरठः परंजो मारू जैजयंती तथापरा ।
कक्कुभाऽपि च कामोदः कामोदी लोकमोदिनी ॥ ४८ ॥

केदारी रागिणी रम्या गौरः स्यान्मालकौशिकः ।
हिंडोलः सुघराई स्यादडानो रागसत्तमः ॥ ४९ ॥
गारेकानरनामा च श्रीरागश्च सुखावहः ।

एते रागाः कर्णाटसंस्थाने ।

केदारस्वरसंस्थाने श्रुतः केदारनाटकः ॥ ५० ॥
जयंतकेदारनामा हृदयेशेन कल्पितः ।
अहीरनाटनामा च गेयो रागस्तथापरः ॥ ५१ ॥
खंबावती ततो गेया शंकराभरणस्तथा ।
बिहागरा च हंमीरः श्यामः श्रुतिमनोहरः ॥ ५२ ॥
छायानाटश्च भूपाली गेया भीमपलाशिका ।
पूरियाकेदारकश्च हृदयेशेन कल्पितः ॥ ५३ ॥
कौशिकस्तु तथा गेयो मारूरागो विचक्षणैः ।

एते रागाः केदारसंस्थाने ।

ईमनस्वरसंस्थान शुद्धकल्याण ईरितः ॥ ५४ ॥
पूरिया विदिता लोके जयत्कल्याण एव च ।

एते रागा ईमनसंस्थाने ।

सारंगस्वरसंस्थाने प्रथमा पटमंजरी ॥ ५५ ॥
वृंदावनी तथा गेया सामंतो वडहंसकः ।

एते रागाः सारंगसंस्थाने ।

मेघरागस्य संस्थाने मेघो मल्लार एव च ॥ ५६ ॥
योगिनी मध्यमादिश्च गौंडमल्लार एव च ।
देवाभरणरागस्तु हृदयेशेन कल्पितः ॥ ५७ ॥
गौडशार्ङ्गनटौ रागौ शुद्धवेलावली तथा ।
अलहिया तथा गेया शुद्धसूहव एव च ॥ ५८ ॥
देशसूहवदेशाखौ शुद्धनाटस्तथैव च ।

एते रागा मेघसंस्थाने ।

कल्पिता हृदयेशेन या हृदयरमा पुनः ॥ ५९ ॥
एतस्याः स्वरसंस्थाने सैव गेया विचक्षणैः ।

एष रागो हृदयरमासंस्थाने ।

धनाश्रीस्वरसंस्थाने धनाश्री ललितस्तथा ॥ ६० ॥

एतौ रागौ धनाश्रीसंस्थाने ।

पूर्वायाः स्वरसंस्थाने पूर्वैव परिगीयते ।

एष रागः पूर्वासंस्थाने ।

सर्वेषामथ रागाणां क्रियन्ते क्रमशः स्वराः ।
तेषु सर्वस्वरेष्वाद्यः षड्ज एवाभिधीयते ॥
तथाहि । सरिगामपधानिसाः सनिधाः पमगा रिसौ ।
रोहावरोहयोगेन संपूर्णा भैरवीमता ॥
सरिगमपधनिस । सनिधपमगरिस ।

इति भैरवी ॥ १ ॥

एवमेव हि संपूर्णा लोला नीलांबरी मता ।

इति नीलांबरी ॥ २ ॥

इति भैरवीसंस्थानान्तर्गतरागस्वरकरणानि ।

धनिसारिगमाश्चैव पधौ धपमगा रिसौ ॥
निधौ च कथिता विज्ञैः संपूर्णा टोडिका मता ।
धनिसरिगमपध धपमगरिसनिस ।

इति मार्गटोडी ॥ ३ ॥

इति टोडीसंस्थानान्तर्गतरागस्वरकरणम् ।

सरिमाः पनिसाश्चैव सनिधाः पमगा रिसौ ।
संपूर्णा कथिता गौरी रोहावरोहयोगतः ॥
सरिगमपधनिस । सनिधपमगरिस ।

इति मार्गगौरी ॥ ४ ॥

रिमपाश्च निसौ षड्जो निपधाः पमगा रिसौ ।
संपूर्णा गीयते गौरी गौरीश्वरकृपान्वितैः ॥
रिमपनिसा सानिधपमगरिस ।

इति देशीगौरी ॥ ५ ॥

गमधाश्च पसौ रोहे रिसौ निधौ पसौ मगौ ।
रिसौ निसौ स्वरैरेभिर्मालवः परिगीयते ॥
गमसधपसरिसनिधप समगरिसरिस ।

इति मालवः ॥ ६ ॥

रिमपाः सनिधा निश्च धपौ ममरिगा रिसौ ।
सनिधा निधपाः सश्च श्रीगौरी गीयतामिह ॥
रिमपसनिधनिधप ममरिगरिस सनिनिधपस ।

इति श्रीगौरी ॥ ७ ॥

पसौ निधपमा मश्च रिगौ रिसौ धनी धनी ।
षड्जश्च स्वरसंपूर्णा चैतीगौरी निगद्यते ॥
पसनिध पमम रिगरि सधनि धनिस ।

इति चैतीगौरी ॥ ८ ॥

सरिमा धपमा गश्च रिमगा रिसमाः पनी ।
ससौ निधपमागाश्च रिमौ च गरिसा निसौ ॥
संपूर्णा गायकश्रेष्ठैः पहारीगौरिका मता ॥
सरिमधपमगरिम गरिसमपनिससनिध
पमगरिसनिस ।

इति पहारीगौरी ॥ ९ ॥

गरी सरी सनी धश्च धनिसाः सरिगाः पमौ ।
धनिसाः सनिधाः पश्च मगौ रिसौ क्रमात्स्वराः ॥

संगीतसारतत्वज्ञैर्देशीटोडी निगद्यते ॥
गरिसरिसानि धधनिससरि गपमौध निस
सनिधपमगरिस ।

इति देशीटोडी ॥ १० ॥

रिपौ धसा धसौ पगौ रिगौ रिसौ यदा स्वराः ।
भवन्ति नूनमौडवस्तदात्र देशकारकः ॥
रिपधसधसपगरिगरिस ।

इति देशकारकः ॥ ११ ॥

सरी मपौ ससौ सश्च निपौ मगौ मरी च सः ।
गौडः खाडवरागस्तु कथ्यते रागवेदिभिः ॥
सरिमपस सनिप मगमरिस ।

इति गौडः ॥ १२ ॥

रिसौ धपौ गरी गश्च तथा रिसधपाश्च सः ।
संगीतज्ञैः स्वरैरेभिरौडुवस्त्रिवणो मतः ॥
रिसधप गरिगरिस धपस ।

इति त्रिवणः ॥ १३ ॥

गमपाश्च निसौ रोहे सनिधाः पमगा मगौ ।
रिसौ च मूलतानी स्यात्संपूर्णेयं प्रभासिका ॥
गमपनिस सनिधपमगमगरिस ।

इति मूलतानीधनाश्रीः ॥ १४ ॥

मधौ निसौ निधपमा गरिसाः स्वरसत्तमाः ।
जायन्ते तेन कथितः संपूर्णोऽयं वसंतकः ॥
मधनिसनिधप मगरिस ।

इति वसंतकः ॥ १५ ॥

रिमपाश्च निसौ रोहे सनिपा मरिसास्ततः ।
एवमेव भवेद्गौरारागराजः किलौडुवः ॥

सरिमपनिस सनिपमरिस ।

इति गौरा ॥ १६ ॥

गमपाः सनिधाः पञ्च मगौकिल रिसौ ततः ।
भैरवः रागराजन्यः संपूर्णः कथितो बुधैः ॥
गमप सनिधपमगरिस ।

इति भैरवः ॥ १७ ॥

पधौ निसौ निधपमाः गरिसाः कथिताः स्वराः ।
भासमानो विभासोऽसौ संपूर्णो भुवि भासते ॥
पधनिस निधपमगरिस ।

इति विभासः ॥ १८ ॥

गपा धसौ निधौ पञ्च गधौ गरिससंयुतौ ।
प्रोक्ता रामकरी कापि संपूर्णा रागवेदिभिः ॥
गपधसनिधप गमगरिस ।

इति रामकरी ॥ १९ ॥

गपौ धसौ सधपगा रिसाविति मताः स्वराः ।
औडुवस्वरसंस्थाना रागिणी गुर्जरी कृता ॥
गपधस सधपगरिस ।

इति गुर्जरी ॥ २० ॥

गपौ धसौ धनिधपा गरिसा विदिताः स्वराः ।
षाडवी गीयते लोकैर्बहुली बहुसंमता ॥
गपधस धनिधपगरिस ।

इति बहुली ॥ २१ ॥

इयमेव पुनः कापि रेवेति कथ्यते जनैः ।
धधौ मगौ च रिनिसा रिगौ न्यासस्तु गस्वरः ॥
भटियालो गीयते लोकैः षाडवो रागपारगैः
धधमगरिनिसारिग ।

इति भटियालः ॥ २२ ॥

गमपाश्च धपौ निश्च धपमा गरिपा मगौ ।
रिमगाः सरसा गेयः संपूर्णः षटरागकः ॥
गमपधपनिध पमगरि पमगरि सगमपस ।

इति षटरागः ॥ २३ ॥

गमपा निसतादैव निपमाश्च गसौ तथा ।
मालश्री रागिणी रम्या जायते सर्वथाऽद्भवी ॥
गमपनिध सनिपमगस ।

इति मालश्रीः ॥ २४ ॥

सरिगा मधसा निश्च मधपा गरिसास्तथा ।
रिगमाः सर्वजीवायां संपूर्णः पंचमो मतः ॥
सरिगमधसनिमधप गरिस रिगम ।

इति पंचमः ॥ २५ ॥

गमौ पसौ निधपमा गरिसाः कथिताः स्वराः ।
संपूर्णा कथिता विज्ञैर्जयंतश्रीस्तु रागिणी ॥
गमपसनिधपमगरिस ।

इति जयंतश्रीः ॥ २६ ॥

मपौ धसौ निधपमा गरिसाः कथिताः स्वराः ।
आसावरी जनैर्गेया रागिणी रागपारगैः ॥
मपधस निधपमगरिस ।

इति आसावरी ॥ २७ ॥

मपौ धसौ निधपमा गरिसाः कथिताः स्वराः ।
देवगांधारनामासौ कथितो रागसत्तमः ॥
मपधस निधपमगरिस ।

इति देवगांधारः ॥ २८ ॥

मपौ धसौ रिसानिधाः पमगा रिसधाः सरी ।
संपूर्णा रागिणी रम्या सिंधीआसावरी मता ॥

मपधस रिसानिध पमगरिसधसरि ।

इति सिंधीआसावरी ॥ २९ ॥

सरी रिमौ मपपसाः ससौ निधपमामरी ।
ससौ रिमरिसा वर्णैर्भवेद्गुणकरी स्वरैः ॥
सरिरिम मपपससससनिधपमगरिससरिमरिस ।

इति गुणकरी ॥ ३० ॥

इति गौरीसंस्थानान्तर्गतरागस्वरकरणानि ॥

गमौ मगरिसा निश्च सरिसा रिसगा रिसौ ।
ससौ ससरिसा निश्च ससौ च सरिसा निधौ ॥
पमौ ममपमाः पश्च धनिसा धनिपा ममौ ।
गरिसा इति कर्णाटो गीयतेऽति विरागिभिः ॥
ग म म ग रि स नि सा रि स रिस ग रि
स स स स स रि स नि स ।
स स रि स नि ध, प म म म प म प ध
नि स नि ध नि प म म ग रि स ॥

इति कर्णाटः ॥ ३१ ॥

सरी गमौ पधनिसाः सनिधाः पमगास्तथा ।
मरिसा ॥

इति केदारी ॥ ३२ ॥

गमौ धनी ससौ निश्च धमौ गसौ ततः क्रमात् ।
रिपहीनश्चित्तहारी हिंडोल ओडुवो मतः ॥
ग म ध नि स स नि ध म ग स ।

इति हिंडोलः ॥ ३३ ॥

गरी गपौ मपौ मो धो निसौ सनी धपौ मपौ ।
गमौ रिसाविति पूर्णा सुघराई सुरागिणी ॥

स रि ग म प ध नि स सनि ध प म
प ग म रि स ।

इति सुघराई ॥ ३४ ॥

धसौ रिमौ पमौ धश्च रिसौ निधपमा गमौ ।
परिसाः कथितो लोकैरडानो पूर्णतां गतः ॥
ध स रि प म म प म ध नि स नि
ध प म प म ग म रि स ।

इति अडाना ॥ ३५ ॥

निधौ निसौ निधपमा गमौ मपधपा मगौ ।
रिसाविति च संपूर्णो गारेकर्णाट इष्यते ॥
नि ध नि स नि ध प म ग म म प ध
प म ग रि स ।

इति गारेकर्णाटः ॥ ३६ ॥

रिमौ पनिससा निश्च धपौ मगरिगा रिसौ ।
मधौ रिगरिसाः पूर्णः श्रीरागो रागसत्तमः ॥
रि म प नि स नि ध प म ग रि ग रि
स म ध रि ग रि स ।

इति श्रीरागः ॥ ३७ ॥

इति कर्णाटसंस्थानान्तर्गतरागस्वरकरणानि ॥

गमौ पसौ निधपगा मरिसा इति सुस्वराः ।
केदारो रागराजन्यः संपूर्णः कथितो बुधैः ॥
ग म प स नि ध प ग म रि स ।

इति केदारः ॥ ३८ ॥

गमौ पनी सनिपमा गरिसा इति च क्रमात् ।
षाडवः सकलैर्विज्ञैः केदारनाट उच्यते ॥

ग म प नि स नि प म ग रि स ।

इति केदारनाटः ॥ ३९ ॥

गमौ पनी सनी धश्च पमौ गमरिसाः सनी ।
सगाविति च संपूर्णो जयत्केदार उच्यते ॥
ग म प नि स नि ध प म ग म रि
स स नि स ग ।

इति जयत्केदारः ॥ ४० ॥

गमौ पनी सनी पश्च मगौ रिसौ तथा स्वराः ।
अहीरनाटनामासौ षाडवः परिकीर्तितः ॥
गमपनिस निपमगरिस ।

इति अहीरनाटः ॥ ४१ ॥

गमौ पनी सनिधपा मगौ मरिसगाश्च मः ।
खंबावती च संपूर्णा कथ्यते गायकोत्तमैः ॥
गमपनिस निधपमगमरिस गम ।

इति खंबावती ॥ ४२ ॥

गमौ पनी सनिधपा मगौ रिसौ पनी च सः ।
शंकराभरणो रागः संपूर्णः कथितो बुधैः ॥
गमपनिस निधपमगरिस परिस ।

इति शंकराभरणः ॥ ४३ ॥

गमौ पनी सनिपमा गारिसाः सरिगा मगौ ।
रिसौ निसौ निगदितः षाडवोऽसौ विहागरः ॥
गमपनिस निपमगरिस सरिगमगरिस निस ।

इति विहागरः ॥ ४४ ॥

गमौ पनी धनी सोरिः सनिसा रिगमाः पधौ ।
मपौ सरी सनिधपा मपौ गमगमा रिसौ ॥
हंमीररागराजन्यः संपूर्णः कथितो बुधैः ॥

गमपनिधनिसरिस निसरिगमपधमपसरिसनिध
पमए गमग मरिस ।

इति हंमीरः ॥ ४५ ॥

गमौ पधौ निधपमाः पमौ मरी सरी पमौ ।
गमौ च कथितो रागः संपूर्णः श्यामनाटकः ॥
गमप सनिधप ममपमरिसरिमपपम ।

इति श्यामनाटः ॥ ४६ ॥

गमौ पसौ निधपमा निधौ मगौ मरी च सः ।
संपूर्णः कथ्यते लोकैश्छायानाट इति ध्रुवम् ॥
गमपसनिधपम निधमगमरिस ।

इति छायानाटः ॥ ४७ ॥

गमौ धसौ सधपगा रिगौ रिसधपा धसौ ।
रिगौ रिगरिसाश्चैव भूपाली कथितौडुवी ॥
गपधससधपगरिगरिस धपधसरिगरिगस ।

इति भूपाली ॥ ४८ ॥

गमौ पनी ससनिपा मगौ रिसनिसास्तथा ।
षाडवी भाव्यतां भव्यैर्भव्या भीमपलाशिका ॥
गमप निस सनिपम गरिसनिस ।

इति भीमपलाशिका ॥ ४९ ॥

मधौ निसौ निधपमा गमौ रिसाविति क्रमात् ।
पूरियापूर्वकेदारः संपूर्णः कथितो बुधैः ॥
मधनिस निधपमगमरिस ।

इति पूरियाकेदारः ॥ ५० ॥

गमधाः काकली निश्च ससौ निधमगा रिसौ ।
षाडवः कथितः सद्भिः कौशिकः कुशिकप्रियः ॥
गमधनिस सनिधमगरिस ।

इति कौशिकः ॥ ५१ ॥

गमौ पसौ निधपमा गसाविति च षाडवः ।
मारूरागवरो लोकैर्गीयते गुणहुंफितः ॥
गमपस निधपमगस ।

इति मारू ॥ ५२ ॥

इति केदारसंस्थानान्तर्गतरागस्वरकरणानि ॥

सरी गमौ पधनिसा निधौ पमौ गरी च सः ।
ईमनो गीयते लोकः सर्वस्वरसमन्वितः ॥
सरिगमपधनिस निधपमगरिस ।

इति ईमनः ॥ ५३ ॥

गपौ धसौ सधपगा रिसाविति च सुस्वराः ।
औडुवो गायकश्रेष्ठैः शुद्धकल्याण उच्यते ॥
गपधस सधपग रिस ।

इति शुद्धकल्याणः ॥ ५४ ॥

मधौ निसौ निधपमा गरिसा इति च क्रमात् ।
पूरिया कथ्यते पूर्णा लोकरंजनरागिणी ॥
मधनिस निधपमगरिस ।

इति पूरिया ॥ ५५ ॥

गमौ पसौ निधपमा गरिसाः सरिगाश्च सः ।
सनी सगौ च संपूर्णो जयत्कल्याण उच्यते ॥
गमपस निधपमगरिस सरिगससनिसग ।

इति जयत्कल्याणः ॥ ५६ ॥

इति ईमनसंस्थानान्तर्गतरागस्वरकरणानि ॥

सरी गमौ पधनिसा निधौ पमौ गरी च सः।
संपूर्णः कथितः सर्वैः सारंगो रागसत्तमः ॥
सरिगमपधनिस निधपमगरिस ।

इति सारंगः ॥ ५७ ॥

सरी पमौ पमौ पश्च निसौ सनिपमा रिसौ ।
औडुवी कथ्यते लोकै रागिणी पटमंजरी ॥
सरि पम पम पनिस सनिपमरिस ।

इति पटमंजरी ॥ ५८ ॥

सरिगा धपगा मश्च गरिसा औडुवी क्रमात् ।
वृंदावनीति विज्ञेया विज्ञैर्विज्ञसुखावहा ॥
सरिगधप गपगपगरिस ।

इति वृंदावनी ॥ ५९ ॥

निसौ निसौ रिमरिमाः पमौ पनिससा निपौ ।
मरी निरी स उक्तोऽसौ सामंतो हि तदौडुवः ॥
निस निस रिम रिम पम पनिस
सनिपम रिनि रिस ।

इति सामंतः ॥ ६० ॥

सरीपसौ सपधपा रिमौ रिसाविति क्रमात् ।
औडुवस्वरसंपन्नो बडहंसो निगद्यते ॥
सरिपस सपधप रिमरिस ।

इति बडहंसः ॥ ६१ ॥

इति सारंगसंस्थानान्तर्गतरागस्वरकरणानि ॥

सरी पमौ पधनिसा रिसौ निधपमा ममौ ।
रिसौ रिसौ निधपमाः पसौ मेघो हि षाडवः ॥
सरिपम पधनिस रिस निधपम मम
रिसनिधप मपस ।

इति मेघः ॥ ६२ ॥

सरिपमपधा निश्च सधपा धपमा ममौ ।
रिसा औडुवतां यातो मल्लारो रागपुंगवः ।
सरिपम पधनिस धप धप ममम रिस ।

इति मल्लारः ॥६३ ॥

पमौ धनी सधपमाः पगौ रिगौ रिसौ रिसौ ।
रिसौ च धनिसा पूर्णा योगिनी द्योतते भुवि ॥
पमध निस धप मप गरिगरिस निसध निस ।

इति योगिनी ॥ ६४ ॥

मपौ निसौ रिसनिपा मपौ मरी सनी सरी ।
मरी मरी निसावेवं मध्यमादिर्मतौडुवी ॥
पगप निस रिस निप मप मरिस निरीस
रिमरी निस ।

इति मध्यमादिः ॥ ६५ ॥

धसौ धमौ पमौ गश्च रिरी पमौ रिमौ ततः ।
मरिसाः षाडवो रागो गौंडमल्लार उच्यते ॥
धसधम पम मगरि रिमप रिमम रिस ।

इति गौंडमल्लारः ॥ ६६ ॥

गमौ पसौ निपमगा रिसौ निसौ धपौ मगौ ।
रिसौ निसौ च संपूर्णो देवाभरण उच्यते ॥
गमप सनिपम गरिस निस धपमगरिस निस ।

इति देवाभरणः ॥ ६७ ॥

गमौ पसौ निधपमा गरिसाः सरिमाः स्वराः ।
संपूर्णो रागराजन्यो गौरसारंग उच्यते ॥
गमपस निधपमगरिस सरिग ।

इति गौरसारंगः ॥ ६८ ॥

गमौ धपौ संरी सश्च निधपा धपमा गरी ।
सगौ मधपमा गश्च रिसौ रिसौ निसौ पमौ ॥
पसाविति च संपूर्णो नटरागोऽभिधीयते ॥
गमधपसरिस निधप धपम गरि सगमधपमगरिसरिस
रिसनिधपमपस ॥

इति नटः ॥ ६९ ॥

सरी गमौ पधनिसा रिसौ धपगमा रिसौ ।
पधौ निसौ च संपूर्णा प्रोक्ता वेलावली बुधैः ॥
सरिगमपधनिस रिस धपगम रिस पधनिस ॥

इति वेलावली ॥ ७० ॥

सरी गपा मगौ पश्च धसौ निधौ पधौ निधौ ।
पमौ गरी सरी गश्च पमौ गपौ तथा स्वराः ॥
अल्हैया कथ्यते लोकैः संपूर्णा रागवेदिभिः ।
सरिगप मगपधस निधपधनिधप मगरि सरिगपमगम ।

इति अलाहिया ॥ ७१ ॥

मपसाः सरिसाः सश्च सधपा मममा रिसौ ।
रिसगा मपगा रिश्च सरिसाः कथिताः स्वराः ॥
षाडवो ज्ञातसंगीतैः शुद्धसूहव उच्यते ॥
मपस सरिस ससधप मममरिस रिसगमपगरिसरिस ।

इति शुद्धसूहवः ॥ ७२ ॥

समपा सनिसा निश्च धपगा मरिसास्तथा ।
संगीतज्ञैः स संपूर्णो देशीसूहव उच्यते ॥

इति देशीसूहवः ॥ ७३ ॥

रिमौ पमौ सधपमाः परिगमरिसा था ।
देशाखो हि विशेषेण षाडवः कथि बुधैः ॥
रिगमपस धपमप रिगमरिस ।
इति देशाखः ॥ ७४ ॥
सरी गमौ पधनिसाः सनिधाः सा पा मगौ ।
रिगौ मपौ निपमपाः सनिसा रिरि रिगौ ॥
मगौ रिसमपा गश्च रिसौ निश्चेति स्वराः ।
कथ्यते शुद्धगीतज्ञैः संपूर्णः शुद्धन कः ॥
सरिगमपधनिस सनिपम निपमग मपनिप
मसानिस रिगम गरिस पमगरिसनि ॥
इति शुद्धनाटः ॥ ७५ ॥
इति मेघसंस्थानान्तर्गतरागस्वरकरणानि ।

समौ पमौ धपमगा रिसौ पसौ सरी मसौ ।
रिसौ मगरिसाः पूर्णाः सा हृदयरमा मता ॥
समगमधप मगरिस पससरि मसरिस मगरिस ।
इति हृदयरमासंस्थानान्तर्गतरागस्वरकरणम् ॥ ७६ ॥

गमौ पसौ निधपमा पपौ मगरिसा रिमौ ।
निधौ निसौ च संपूर्णा धनाश्रीर्धीमता मता ॥
गम पस निधपमप पमगरि, गरिस निधनि, स ।
इति धनाश्रीः ॥ ७७ ॥
गमपा धनिसा निश्च धमपा गरिसास्तथा ।
पूर्णो माधुर्यवलितो ललितः कलितो बुधैः ॥
गमपधनिस निधमपगरिस ।
इति ललितः ॥ ७८ ॥
इति धनाश्रीसंस्थानान्तर्गतरागस्वरकरणानि ।

अपूर्वा रागिणी पूर्वा संपूर्णा गीयते बुधैः ।
पनिधप पमपमगरिस ।

इति पूर्वा ॥ ७९ ॥

इति पूर्वा संस्थानान्तर्गतरागस्वरकरणम्

धसौ रिमपधाः सश्च सनिधाः पमगा रिसौ ।
संपूर्णा गीयते लोकैर्मुखारी मार्गरागिणी ॥
धसरिमपधस सनिधप मगरिस ।

इति मुखारी ॥ ८० ॥

इति मुखारी संस्थानान्तर्गतरागस्वरकरणम् ।

ठाठ १२; दीपकसहितः ।

सर्वं संगीतशास्त्राणां सारमाकृष्य निर्मितम् ।
अनुग्राह्यमिदं विज्ञैरन्यदन्यत्र विस्तरम् ॥

इति देशीरागस्वरकरणप्रकरणं संपूर्णम् ॥

इति गढादेशनरेशश्रीहृदयसाहिविरचितं
हृदयकौतुकं समाप्तम् ।

श्रीः । श्रीरस्तु । कल्याणमस्तु ।

